# 2023

## SANSKRIT

( Honours Core )

Paper : SKT–HC–3016

**[ Classical Sanskrit Literature (Drama) ]**

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

UNIT—I

**( Svapnavāsavadattam : Act I & VI )**

**( स्वप्नवासवदत्तम् : प्रथमाङ्कः षष्ठाङ्कः च )**

( *Marks* : 20 / अङ्का: 20 )

1. Answer the following : 1×3=3

अधोलिखितानां प्रश्नानां लघूत्तराणि प्रदेयानि—

*(a)* Who is the heroine of the drama, *Svapnavāsavadattam*?

स्वप्नवासवदत्ताख्यस्य नाटकस्य नायिका का?

(b) What is the name of the village where the ascetic lived?

किमासीत् तस्य ग्रामस्य नाम यत्र ब्रह्मचारी निवसति स्म?

(c) Which king is referred to in the भरतवाक्य of the *Svapnavāsavadattam*?

स्वप्नवासवदत्तगतभरतवाक्ये कस्य राज्ञः नाम वर्त्तते?

**2.** Who is वसन्तक? Why is he called so? 1+1=2

कोऽस्ति वसन्तकः? कथं स एवम् आख्यातः?

**3.** Explain any *one* of the following : 5

अधस्तनयोः एकस्य व्याख्या करणीया—

(a) सुखमर्थो भवेद्दातु सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत्सर्वं दुःखं न्यासस्य रक्षणम्॥

(b) कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥

**4.** Answer any *one* of the following : 10

अधस्तनयोः एकस्य उत्तरं देयम्—

(a) Write a note on the special features of Bhāsa's writing.

भासकृतौ प्रतिफलितां विशेषशैलीम् अवलम्ब्य एका टिप्पणी लेखनीया।

(b) Discuss the dramatic significance of the story of the ब्रह्मचारी which is described in the First Act of the *Svapnavāsavadattam*.

स्वप्नवासवदत्तगतप्रथमाङ्के यः ब्रह्मचारिवृत्तान्तः आलोचितोऽस्ति तस्य नाटकीयतात्पर्यं विशदीकरणीयम्।

## UNIT—II

## ( Abhijñānaśakuntalam : Act I & IV )

## ( अभिज्ञानशकुन्तलम् : प्रथमाङ्कः चतुर्थाङ्कश्च )

( *Marks* : 20 / अङ्काः 20 )

5. Answer the following questions :

अधोलिखितानां प्रश्नानाम् उत्तरं प्रदेयम्—

(a) Which Mahākāvya is regarded as the origin of the *Abhijñānaśakuntalam*? 1

अभिज्ञानशकुन्तलस्य मूलरूपेण किं महाकाव्यं स्वीक्रियते?

(b) What is the background story of the term 'शकुन्तला'? 2

शकुन्तलाशब्दोत्पत्तिविषये या कथा अस्ति तद्विषये आलोच्यताम्।

(c) Fill in the blanks : 2

रिक्तस्थानानि पूरयत—

_____ ददच्चक्षुस्त्वयि _____ ।

_____ साक्षात् पश्यामीव _____ ॥

6. Explain any *one* of the following : 5

अधोलिखितयोः एकस्य व्याख्या करणीया—

(a) जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि॥

(b) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

7. Answer any *one* of the following questions : 10

अधस्तनेषु एकस्य प्रश्नस्य उत्तरं देयम्—

(a) Discuss the subject matter of the First Act of the *Abhijñānaśakuntalam*.

अभिज्ञानशाकुन्तलगतप्रथमाङ्कस्य विषयवस्तु लेखनीयम्।

(b) Analyze the importance of the following saying :

अधोलिखितस्य वाक्यस्य गुढार्थः विवेचनीयः —

"तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्।"

(c) Write a note on the style of writing of Kālidāsa.

कालिदासीयरचनशैलीविषये एका टिप्पणी विरचनीया।

## UNIT—III

### ( Mudrārākṣasam : Act I, II & III )

### ( मुद्राराक्षसम् : प्रथमाङ्कः, द्वितीयाङ्कः तृतीयाङ्कश्च )

( *Marks* : 20 / अङ्काः 20 )

**8.** Answer the following very briefly : 1×3=3

अधोलिखितानां लघूत्तराणि प्रदेयानि—

*(a)* How many Acts are there in the 'मुद्राराक्षसम्'?

मुद्राराक्षसे कति अङ्का वर्त्तन्ते?

*(b)* Who is शकटकासः?

शकटदासः कोऽस्ति?

*(c)* Who is the composer of the 'मुद्राराक्षसम्'?

केन प्रणीतं 'मुद्राराक्षसम्' इति?

**9.** Explain the meaning of the title 'मुद्राराक्षसम्'. 2

'मुद्राराक्षसम्' इति शीर्षकस्य अर्थः विश्लेषणीयः।

**10.** Explain any *one* of the following verses : 5

अधस्तनयोः एकस्य श्लोकस्य व्याख्या कार्या—

*(a)* चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः।
न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते॥

*(b)* तं सम्प्रत्युपचीयमानमपि मे लब्धान्तरः सेवया।
लोभो राक्षसवज्जयाय यतते जेतुं न शक्नोति च॥

**11.** Answer any *one* of the following : 10

अधस्तनयोः एकस्य उत्तरं प्रदेयम्—

(a) Discuss the salient features of the drama, *Mudrārākṣasam*.

मुद्राराक्षसनाटकस्य वैशिष्ट्यानि सूचयतु।

(b) Sketch the character of चाणक्य on the basis of the drama, *Mudrārākṣasam*.

मुद्राराक्षसनाटकाधारेण चाणक्यचरित्रं विचारयतु।

## UNIT—IV

**( Critical Survey of Sanskrit Drama )**

**( संस्कृतनाटकस्य समीक्षात्मकं पर्यवेक्षणम् )**

( *Marks* : 20 / अङ्काः 20 )

**12.** Answer the following : 1×3=3

अधोलिखितानाम् उत्तरं प्रदेयम्—

(a) Fill in the blank :

रिक्तस्थानं पूरयतु—

काव्येषु _____ रम्यम्।

(b) Which of the following adjectives does not go with Sanskrit drama?

अधस्तनेषु विशेषणेषु किं संस्कृतनाटके न प्रवर्त्तते?

पञ्चसन्धिसमन्वितम् ; ख्यातवृत्तम् ; वियोगात्मकम्।

(c) What is the generic name used for Sanskrit drama?

संस्कृतनाटकस्य साधारणं नाम किमस्ति?

13. Write a short note on 'अङ्गी रस' of a Sanskrit drama. 2

संस्कृतनाटकनिष्ठम् अङ्गिरसम् अधिकृत्य एका लघ्वी टिप्पणी लेखनीया।

14. Write notes on any *one* of the following : 5

अधस्तनयोः एकस्य विषये टिप्पणी विरचनीया—

नायकः ; प्रस्तावना।

15. Answer any *one* of the following : 10

अधस्तनेषु **एकस्य** उत्तरं प्रदेयम्—

(a) Write an introductory note on the dramas ascribed to Bhavabhūti.

भवभूतिप्रणीतानि नाटकानि आश्रित्य एकः नातिदीर्घः प्रबन्धः विरचनीयः।

(b) Discuss the specific features of Sanskrit drama.

संस्कृतनाटकलक्षणविषये आलोचयतु।

(c) Point out the Vedic origin of Sanskrit drama and show the differences between Sanskrit drama and Greek drama.

संस्कृतनाटकोत्पत्तिविषये वैदिकसम्बन्धसूत्रं यदस्ति तद्विषये आलोच्यतां, तथा च संस्कृतनाटक-ग्रीकनाटकयोर्मध्ये यत् पार्थक्यम् अस्ति तद्विषये लिख्यताम्।

★ ★ ★